# वाल्मीकिरामायणे परिवेशभावना

भारतीयसंस्कृतेः अन्यतमं मूलस्तम्भस्वरूपं तदेव आदिकवेः वाल्मीकेः अपुर्वं महाकाव्यं रामायणम् इति। द्रष्टव्यं यत् वर्तमानयुगस्य परिवेशभावनायाः वीजानि अपि रामायणे सुप्तानि सन्ति। तथापि स्मर्तव्यं यत् रामायणं प्राचीनमहाकाव्यं, न तु परिवेशविज्ञानम्। अतः रामायणे यत् परिवेशचिन्तनं लभ्यते तस्य स्पष्टतया उल्लेखः न भविष्यति। यतः परिवेशदूषणं तस्य निवारणार्थं प्रयत्नाः च तदा इदानीमिव न आसन् । तत्र यत् आसीत् तत् मनुष्येण सह प्रकृतेः निकटसम्वन्धः आसीत् ।

- **रामायणे पक्षि-संरक्षणस्य संकेतः** --

रामायणस्य वालकाण्डे रामायणरचने आख्यानमूलस्थः प्रसङ्गः विशेषतया महत्त्वपूर्णः अस्ति । क्रौञ्चं भयंकरस्य व्याधस्य बाणेन वधं दृष्ट्वा हृदयविदारकं क्रौञ्चीक्रन्दनं श्रुत्वा महर्षिः वाल्मीकिः शोकेन अभिभूतः भूत्वा व्याधं शापं दत्तवान् -

**"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**

**यत्क्रौंचमिथुनादेकमवधी काममोहितम्"।।**

- **अनावश्यकं प्राणीसंहारः न न्यायः** --

यदा सुतीक्ष्णः रामचन्द्रं स्वाश्रमे दीर्घकालं यावत् तिष्ठतु इति उक्तवान् तदा रामचन्द्रः केनचित् कारणेन न सहमतः, यत् सः सुतीक्षस्य आश्रमे आगच्छन्तं मृगं अकारणं मारयति चेत्। अर्थात् रामचन्द्रः अकारणं पशूनां नाशं कर्तुम् न इच्छति।

**"तानहं सुमहाभाग मृगसङ्घान् समागतान्।**

**हन्यां निशिताधारेण शरेणाशनिर्वचसा ॥**

**भभवांस्तत्रभिषज्येत किं स्यात् कृच्छतरं ततः।**

**एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये" ॥ (आरण्यकाण्ड)**

प्राकृतिकपरिवेशस्य संरक्षिका सीतादेवी रामचन्द्रं चेतयति यत् **– "तृतीयं यदि रौद्र परप्राणाभिहिंसनम् । निर्वैरं क्रियते मोहात्तच्च ते समुपस्थितम्"॥(वाल काण्ड)**

अधिकं वदति**- "अपराधां विना हन्तुं लोकन् वीर न कामये"। (आरण्यकाण्ड)**

-- सीतायाः एतत् कथनं वन्यजीव (संरक्षण) अधिनियमस्य १९७२ तमस्य वर्षस्य अपि स्मरणं करोति ।

आरण्यकाण्डस्य ७३ तमे प्रवचने कवन्धः रामं पम्पानद्याम् विचरनानाम् पशूनां विषये कथयति एते न विभेति जनान्दर्शनात् न च जानन्ति स्म कस्य वधम् -

**"नोद्विजन्ते नरान् द्रष्टवा वधस्याकोविदाः पुरा" (आरण्यकाण्ड) ।**

- **आश्रमप्रकृतेः परस्पराश्रयः --**

जनाः,वृक्षाः,पशवः – एतेषां सर्वेषां मध्ये एकः सम्बन्धः अस्ति – ते सर्वे प्राकृतिकपरिवेशस्य अङ्गाः सन्ति। यदि एतत् योगं निर्वाह्यते तर्हि परिवेशस्य रक्षणं सामान्यं भवति । रामायणे वनस्पतीनाम् मंगलकामना क्रियते- **"सर्षिसङ्घः सकाकुत्स्थ आमन्त्र्य वनदेवता", "स्वस्ति वोऽस्तु गमिष्यामि सिद्धः सिद्धश्रमादहम्"(बालकाण्ड)।**

प्रयामाना आश्रमस्य मृगाः पक्षिणश्च तपसदृशाःतपसदृशाः-

**"मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः ।**

**अनुजग्मुर्महात्मानं विश्वामित्रं महामुनिम्"॥**

- अत्र ये मनुष्याणां पशूनां च सद्सम्बन्धाः व्यक्ताः सन्ति ते परिवेशरक्षणे सहायकाः।

- **अगस्त्यमुनेः विन्ध्यशासनम् परिवेशरक्षणाय महत्वपूर्णः** --

वने महर्षेः इव्मवाहस्य आश्रमस्य वर्णनायां तथा इव्मवाहस्य अग्रजस्य महर्षेः अगस्त्यस्य आश्रमस्य मार्गस्य वर्णनायां जनानां, वनस्पतीनाम् पशूनां च शान्तसहजीवनस्य चित्रं प्राप्यते। परन्तु विन्ध्यपर्वतस्य शासनेन महर्षेः अगस्त्यस्य

कृतं कार्यं परिवेशरक्षणे अतीव महत्त्वपूर्णम् अस्ति । विन्ध्यपर्वतः सूर्यस्य मार्गं निवारयितुं उदयमानः आसीत् । सूर्यप्रकाशः अवरुद्धः चेत् क्षतिः। यतः परिवेशरक्षणाय सूर्यप्रकाशः अत्यावश्यकः अस्ति । महर्षि: अगस्त्य एव विन्ध्यं निवारयति स्म।

**"गतिं निरोद्ंधु निरातो भास्करस्यचलोत्तमः ।**

**निर्देशं पालयन् यस्य विनध्यः शैलो न वर्धते॥**

**अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः।**

**अगस्त्यस्याश्रमः श्रीमान् विनितजनसेवितः"॥ (अरण्यकाण्ड)**

- **वनस्पतिसंरक्षणस्य महत्त्वम् --**

उद्भिदेषु अन्यतमा अषधिः। राम-रावण-युद्धे रावण-प्रक्षिप्त-शक्त्या यदा लक्ष्मणः क्षत-मूर्च्छितः अभवत्, तदा ज्ञानी सुषेण-हनुमानः औषध-पर्वतं गत्वा विशल्यकरणी, सवर्णकरणी, सञ्जीवनी सान्धनी चेति चतुर्विधानि ओषधीनि आनयितुं उक्तवान्-

**"दक्षिणे शिखरे तस्य जातामोषधिमानय ॥**

**विशल्यकरणीं नाम विशल्यकरणीं शुभाम् ।**

**सावर्णकरणीं चापि तथा सञ्जीवनीमपि॥**

**सन्धानकरणीं चापि गत्वा शीघ्रमिहानय।**

**सञ्जीवनार्थं वीर्य लक्षणस्य महात्मनः"॥ (युद्धकाण्ड)**

औषधपर्वतं गत्वा औषधं सम्यक् ज्ञातुं न शक्नुवन् हनुमान् समयं न व्ययितवान् । भेषजयुक्तं शृङ्गं उद्धृतवान् -

**"ओषधिं नावगच्छामि तमहंहरिपुङ्गव।**

**तदिदङ्ग शिखरं कृत्स्नं गिरेस्तस्याहृतं मया"॥(युद्धकाण्ड)**

सुषेण तस्मात् शृङ्गात् औषधं गृहीत्वा लक्ष्मणं चिकित्सितम्। वनस्पतिशक्त्या लक्ष्मणः स्वस्थः अभवत् । अतः वनस्पतिविनाशं न करनीयम् । वनस्पतयः जनान् महासंकटात् उद्धारयितुं शक्नुवन्ति ।

**उपसंहारः --**

रामायणम् इति महाकाव्यम्। स्मृतिशास्त्रादिवत् सामाजिकविधानम् अत्र न लभ्यते । परन्तु क्रौचसंहारः सुतीक्षस्य आश्रमवर्णना, विन्ध्यशासनम् इत्यादिषु स्थानेषु पपरिवेसंरक्षणस्य संकेतः दृश्यते । अतः अस्य महाकाव्यस्य मूल्यं न न्यूनम् ।

-- By Sanjoy Barman